अप्रशा ग्रंथ है।
लेखक एवं पुस्तक का नाम
कुछ भी नहीं है।
केवल 7 पेज ही मौजूद है।
सन्स्कृत भाषा में लिखि गई
है।
15"x5"

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग्रं॰ नं ९१

तथाचकर्मणितादृशविशिष्टसत्तात्वरूपेणपक्षधर्मतानिर्णयान्नोक्तानुशयःसंभवतीत्यतआहअयमिति।अयंपक्षवृत्तिः।विशिष्ये
ति।तथाचधूमत्वादिप्रकारेणपक्षधर्मतासंदेहदशायामुक्तप्रकारासंभवात्तदानीमनुमित्यर्थमपिद्वितीयकल्पानुसरणमिति
भावः।सामान्यतः।साध्यसंबंधितावच्छेदकत्वप्रकारेण)इदंचस्वरूपसंबंधविशेषः।वच्छेदकत्वमित्याशयेनप्रकारांतरेणावच्छेदक
त्वोक्तौतद्धर्मनिवेशस्यावश्यकत्वादितिदूषयन्नाद्येदूषणमाह।प्रमेयत्वादाविति।तथाचवन्हिमान्प्रमेयादित्यादौव्याप्तिरितिभा [वति]
वः।उभयत्रैवतदाह।धूमत्वादाविति।वन्ह्यादौसाध्यइत्यनुषज्यते।तथाचवन्हिमान्धूमादित्यत्रव्याप्तिलक्षणाव्याप्तिरितिभावः।कर्म
ण्यतित्वावच्छेदेनेति।कर्मादिसमवेतत्वावच्छेदेनेत्यर्थः।कर्मावच्छेदेनेत्युक्तौकर्मणिसत्तायांनगुणसामानाधिकरण्यमितिवदि
दानींसत्तादौनगुणसामानाधिकरण्यमित्यपिप्रतीतिःस्यात्कर्मणएवइदानींकालत्वादतोवृत्तिविशेषानुधावनंतेनकालिकसं

य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शि॰टी॰ज्ञा॰ वंधेनयत्कर्मवृत्तित्वंतदवच्छेदेनगुणसामानाधिकरण्यपर्यवसन्नत्वात्तेनोक्तप्रतीत्यापत्तिरितिभावः। नतथा·नसत्तात्वंगुणसंबंधित्वाभा
१२ ववद्वृत्ति। विशिष्टेति। कर्मवृत्तित्वावच्छेदेनगुणसामानाधिकरण्याभाववत्यांसत्तायांवर्तमानत्वाद्विशिष्टसत्तात्वमप्यवच्छेदकंनस्यात्
१७ तथाचगुणवान्विशिष्टसत्तादित्यादावव्याप्तिरितिभावः। ननुसामानाधिकरण्यस्याव्याप्यवृत्तित्वमंगीकुर्वतः सार्वभौमस्यमतेविशि
ष्टस्यातिरिक्तत्वान्नेषदोषइत्यतआह। प्रागिति। तथाचस्वावयवेधूमेनवन्हिसामानाधिकरण्यमितिप्रतीतेर्धूमेपिवन्हिसामानाधि
करण्याभावात्धूमत्वमप्यवच्छेदकंनस्यादितिभावः। नचहेतुताघटकसंबंधेनयद्धेत्वधिकरणंतदवच्छेदेनसामानाधिकरण्याभावस्य राम·
निवेश्यत्वान्नेषदोषः। तथासतिगोत्ववानश्वत्वादित्यादौमहाकालनिरूपितविशेषणतयाहेतुतायामव्याप्त्यापत्तेः। हेतुमन्महाका १७
लावच्छेदेनतादृशसंबंधेनवृत्त्यभावस्याप्रसिद्धेरितिभावः। अतिरिक्तइत्यस्यसाध्यसमानाधिकरणादित्यादिः। ननुधूमासमानाधि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करणास्य घटत्वादेः वन्हित्वविशिष्टाधिकरणीभूतपर्वतावृत्तित्वाद्व्यभिचारवन्हेर्विसादावतिव्याप्तिरत आह। साध्यासमानेति स्वपरं साध्यन
तावच्छेदकीभूतधूमत्वादिपरं। वन्हित्वविशिष्टाधिकरणीभूतपर्वतवृत्तित्वस्य धूमासमानाधिकरणावृत्तित्वादतिव्याप्तिरतः सामान्येति।
तथाच वन्हिमत्संयोगोलकवृत्तित्वस्यैव धूमासमानाधिकरणावृत्तित्वान्नातिव्याप्तिरिति भावः। वृत्तिद्वयानंतर्भावेन पूर्वापेक्षया लघुतरमाह।
स्वविशिष्टेति। गुणवत्सत्तादिसाध्यकाव्याप्तिमुद्धरति। सत्तात्वमादिना। तथैव गुणवद्विशिष्टसत्तादिसाध्यकाव्याप्तिं निरस्यति।
कर्माघन्यत्वेति। यथाश्रुतस्यानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्यापेक्षायां वीजांतरमप्याह। एवं चेति उपपत्तिरिति। अन्यथा वाच्यत्वसामा
नाधिकरण्याभाववति गगनादौ प्रमेयत्वादेः सत्त्वात् वाच्यप्रमेयत्वादिसाध्यकाव्याप्तिरेव स्यादिति भावः। मिश्रमतमनुपस्य निरस्यति पतितेति।
ननु प्रमेयत्वं पदितत्र न व्याप्तिस्तदा उदाहरणादौ तादृशपराहेतोरुन्यासेऽनुचितस्तस्य व्याप्त्युपस्थितिमात्रफलकत्वादत आह तद्धहस्त्वीति। तथा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शि॰टी॰जा॰ वस्त्वंतरवादिनामिव प्रमेयत्वावच्छिन्नविशेष्यकव्याप्तिग्रहार्थमेव प्रमेयत्वादिना उदाहरणादौ हेतोरुपन्यास इति भावः। यदि च व्याप्ति

१५ विरहिवृत्तित्वरूपेणाप्युदाहरणादिना व्याप्तिग्रहः प्रामाणिकस्तदा यो यो द्रव्यवान् स वह्निमानित्यप्युदाहरणं स्यात् द्रव्यत्वस्यापि वह्निवि

हिवृत्तित्वाविशेषादित्यभिप्रेत्याह। व्याप्तिविरहीत्यादि। स्वमते प्रमेयत्वस्यापि व्याप्तिविरहिवृत्तित्वाभावात् तद्दलस्य मार्गेणेत्युक्तं। व्याप्तिग्र

हेतस्योदाहरणादित्यादिः अत्रोदाहरणस्य व्याप्तिविरहिवृत्तिरूपेण व्याप्तिग्राहकत्वेपि न क्षतिः। व्यभिचारिवृत्तिरूपेण व्याप्तिग्राहकत्वनि

यमादेव यो यो द्रव्यवान् स सो वह्निमानित्यादिना व्यस्योदाहरणत्वासंभवादिति दिक्। यत्तु प्रमेयत्वप्रकारेण गगनादौ निरुक्तव्याप्यभा राम॰

वनिश्चयदशायां नादृश्येण धूमादौ व्याप्तिग्रहो न स्यात् समानरूपेणाविरोधिनिश्चयस्यैव तत्त्वात् अन्यथा वह्निर्न धूमव्याप्य इति निर्णये १५

पि वह्निर्धूमव्याप्य इति ज्ञानापत्तेरित्यर्थं इत्याहुः। तन्मंदं। प्रमेयत्वावच्छेदेन व्याप्यनिश्चयस्य विरोधितया तत्सामानाधिकरण्येन व्याप्यनिश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

येपिताद्रूपेणव्याप्तिग्रहसंभवादन्यथाव्याप्यान्यंप्रमेयंनिसमितिधीरव्याप्यांव्याप्यंप्रमेयंजन्यमितिग्रहस्यअप्रलापापत्तेरितिदिक्।साध्यनेवि
।नान्तः समवायेनवन्हेः साध्यत्वेसंयोगेनधूमादिहेतावतिव्याप्तिः उभयत्रैवहेतुतावच्छेदकसंबंधेनावृत्तिमानत्वोक्ताविदमेतद्रूपभिन्नंगुणत्वा
दिसाध्यावतिव्याप्तिः स्यादतआह।येनयेनेति।यथाश्रुतस्यद्रव्यंसत्वादिसाध्यावतिव्याप्तिरितिभावः।हेतुतेति।तेनसंयोगेनवह्निमतिसम
वायेनावर्तमानस्यधूमावयवत्वादेः समवायेनस्वावयवेनतत्संबंधेनद्रव्यावयविवह्निमान्धूमादित्यादौनाव्याप्तिरितिभावः।वस्तुतोलाघवा
दावश्यकत्वाच्चसाध्यसाधनयोरधिकरणेविशेषणतानाविशेष्येणैवावर्तमानत्वमिहाप्यनुसंधेयं।वारणीयत्वेत्विति।वस्तुतः स्वमतेनी
लधूमत्वंव्याप्तिरेवताद्रूप्येणहेतुप्रयोगेतुव्यधिकेनैवनिग्रहस्थानेनपुरुषोनिगृह्यतइतिभावः।स्वेति।स्वं।साध्यसंबंधितावच्छेदकत्वेनाभि
मतं।स्वसमानाधिकरणंतादृशंसाध्यसंबंधितावच्छेदकीभूतंधर्मान्तरंतद्घटितत्वेनेत्यर्थः।तथाचनीलधूमत्वस्यतादृशधूमत्वघटितत्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शि॰टी॰ज॰ देवदत्तासनः द्रव्यं गुणाद्यन्यत्वे सति सत्वादित्यादौ विशिष्टसत्तात्वस्य स्वसमानाधिकरणांयद्गुणान्यत्वादिधर्मान्तरं तद्घटितत्वादव्याप्तिरतः ता
११ दृशेति। तथा च गुणाद्यन्यत्वस्य तत्र साध्यसंबंधितानवच्छेदकत्वात्तन्न घटितत्वेप्येष दोषः। न च महाकालनिरूपितविशेषणतयादिकृत
विशेषणतया वा गुणाद्यन्यत्वस्य हेतुतायां गुणाद्यन्यत्वस्यापि द्रव्यत्वसंबंधितावच्छेदकत्वादुक्तदोषतादवस्थ्यं। प्रकृतहेतुतावच्छेदकसंबं
धेन यत्साध्यसंबंधित्वं तदवच्छेदकधर्मान्तराघटितत्वस्यैव प्रवेश्यत्वात् धूमत्वादेरपि स्वेनैव साध्यसंबंधितावच्छेदकत्वधर्मेणाघटितत्वादवच्छे
दकत्वं न स्यादित्यंतरपदं। न चैवं नीलधूमत्वं नीलत्वविशिष्टधूमत्वं तच्चावच्छेदकं स्यात् धूमत्वस्य नीलधूमत्वाभिन्नतया धर्मान्तरत्वाभावादि॰ राम
तिवाच्यं। स्वानवच्छिन्नप्रकारतावच्छेदकत्वस्य धर्मान्तरपदेन विवक्षितत्वादिति भावः। धूमप्रागभावेति। ननु धूमत्वस्य साध्यसंबंधितावच्छे ११
दकत्वेपि हेतुताघटकस्वरूपसंबंधेन यत्साध्यसंबंधित्वं तदनवच्छेदकत्वेन धूमप्रागभावत्वस्य तद्घटितत्वेपि न क्षतिरित्यत आह आदीति। ते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नधूमविशिष्टस्यसमवायादेःपरिग्रहः। अत्रधर्मस्यस्वसामानाधिकरण्यंहेतुतावच्छेदकताघटकसंबंधेनपक्षाधिकरणेतत्रसाध्यसंबंधि
तावच्छेदकताघटकसंबंधेनवर्त्तमानत्वरूपंग्राह्यं। तेनयथाकथंचित्संबंधेनधूमत्वधूमप्रागभाववत्वयोर्मिथःसामानाधिकरण्येपिनक्षतिः
हेतुतावच्छेदकताघटसंबंधेनस्वाधिकरणेतेनैवसंबंधेनवर्त्तमानत्वंतुननथात्वाच्यं। धूमत्वप्रकारकप्रमाविशेष्यत्वादेरपिव्याप्यतावच्छे
दपि दकत्वापत्तेः ननुनहृदिंतत्वंतद्विषयकप्रतीत्यविषयत्वंतदन्यत्वंचतद्घटितत्वमित्यभावद्वयप्रवेशेगौरवादाह। नद्घटितत्वंचेति। मिश्र
स्यमतत्वानरमुपन्यस्यति। स्वरूपेसाहिना। अतएवेति। अतिप्रसक्तत्वविशिष्टेपिस्वरूपसंबंधरूपावच्छेदकत्वधीसंभवेननतयोर्विरोधप्रतिय
त्वर्थेमेवतत्कुद्ध्यावतारादितिभावः। अन्यथेति। पयनतिरिक्तवृत्तित्वमेवावच्छेदकत्वपदार्थस्तदेत्यर्थः। अतिप्रसक्तेतितत्वावच्छिन्ने। अप्रस
क्तत्वेन। अनाहार्यज्ञानासंभवेनायोगात्। अनुचितत्वादित्यर्थः। गुणावत्त्वादिसाधेसत्तावादेः साध्यसंबंधितावच्छेदकत्वमपाकर्तुंभू

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ग्रिदीजा· भिकामाह॥ विरुद्धयोरित्यादि। एकस्य। एकरूपावच्छिन्नस्य। नेन धूमवान्वन्हेरित्यादौ वन्हिव्यक्तीनां नानात्वेपि न वन्हित्वस्य धूमसंबंधि-
२० तावच्छेदकत्वसंपत्तिः। ननूक्तक्रमेणावच्छेदकभेदापेक्षायामप्रसिद्धांतदुःस्थत आह। अत एवेति। विरोधादिति। एकस्यावच्छेदकत्वकल्प-
नेविनिगमकप्रमाणाभावादिति भावः। विरुद्धयोरित्युक्तेः फलमाह। अव्याप्यवृत्तेरिति। तदभावस्य संयोगाभावस्याविरुद्धत्वादेतद्वसत्व
त्वादेः न साध्यसामानाधिकरण्यावच्छेदकत्वविरोध इत्यग्निमाभ्यामन्वयः। अत्रैवं सति संयोगी सत्वादित्यादावव्याप्यविरुद्धयोः संयोगतदभा-
वयोः सामानाधिकरण्यावच्छेदकत्वं सत्तात्वस्य दुर्वारमिति चिंत्यं। ननु लीलावतीकृन्मते संयोगस्याव्याप्यवृत्तित्वात्तदभावो न वृक्षादाव एम·
तः स्यात्तां तेरविरुद्धयोरित्यस्य फलमाह। संयोगेन चेति। तदभावस्य वन्ह्यभावस्य एकेन संबंधेनेत्यस्य फलमाह। वन्हिमतीति। ननूक्त- २०
व्याप्तेरव्यभिचरितपदकृत्ये साध्यवदन्यवृत्तित्वादिलक्षणव्यभिचारस्य ज्ञातानाविरोधित्वात् हेत्वाभासत्वं न स्यात् अत आह। अभिचारेति। य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हायोगात्सहानुसृतेः तथाचानुभवबलात् भिन्नविषयकमपि ज्ञानं प्रतिबंधकमिति भावः समानविषयकज्ञानमेव विरोधीति
नव्यानां मतमनुसृत्याह। अस्तुवेति। साक्षात्प्राप्ताभावनिर्णायविषया। नन्वेवं व्याप्तिग्रहप्रतिबंधायकथकानां व्यभिचारांतर-
स्योपन्यासो न स्यादत आह। व्यभिचारांतरेति। परंपरयेति। तथाच प्रकृतव्याप्यभावावच्छेदकधर्मे विधयैवोपाधेरिव व्यभिचारां
तरस्याप्युपन्यासः कथायामिति भावः। स्वसमानाधिकरणतादृशधर्मांतरेत्यादिविशेषणप्रक्षेपेणापूर्वकल्पलाघवमावि
ष्करोति। नीलधूमत्वेति। गौरवादिति लघुधर्मसंभवे स्वरूपसंबंधरूपावच्छेदकत्वस्य तत्रैवावस्थितिः स्वभावादिति भावः। न-
नु गुरोरनवच्छेदकत्वे घटवान् कंबुग्रीवादिमत इत्यादौ कंबुग्रीवादिमत्त्वावच्छेदेनापि व्याप्तिर्न स्यात् घटत्वस्यैव लघोस्तथा-
त्वसंभवादतस्तत्रेष्टापत्तिमाह। एवंचेति। ननु गुरुधर्मस्यानवच्छेदकत्वे तदवच्छेदेनापि व्याप्तिग्रहो भ्रमः स्यात् एवं गुरोरनव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रिटीजा भिचारिसांधारणेनापिधर्मेणकथायांहेतोरुपन्यासःस्यात्व्याप्यतानवच्छेदकत्वस्याविशिष्टत्वादित्यतआह।नेनेचेति।कंबुग्रीवादिम
२१ त्वादिनाचेत्यर्थः।तदवच्छिन्नविशेष्यकएवव्याप्तिग्रहोनतुतस्यसाध्यसंबंधितावच्छेदकत्वावगाहिइत्युक्तोनस्वमतानुयोगःसंभवती
त्यतःकथायामित्युक्तं।प्रकारांतरेति।व्यापकसामानाधिकरण्यादिव्याप्तिवादिनामपिस्वरूपसंबंधातिरिक्तस्यव्याप्यतावच्छेदकत्वस्य
दुर्वचत्वादितिभावः।समानइति।परिच्छिन्नव्याप्तिनियतधर्मांतराघटितेनव्याप्तिनियतरूपेणैवहेतोरुपन्यासःसांशयिकइत्युच्यते न
दाममात्रपितुल्यमितिभावः।ननुशरीरयोरवस्थावाच्यपयोरवस्थापिकत्वस्यनापरिपंथित्वात्द्रव्यत्वादेःसाध्येरूपत्वरसत्वादीनांबहूनाम राम॰
प्यवच्छेदकत्वंनस्यात्लाघवेनगुणत्वस्यैकस्यैवतथात्वादित्यतस्तत्रेष्टापत्तिमाहएवमितिननुरूपत्वादिकमिवगुणत्वादिकंनसर्व २१
संबंधिसाधारणमतआह।द्रव्यादीति।आदिपदेनगुणकर्मघटत्वपटत्वकुड्यत्वादीनांपरिग्रहः।द्रव्यसमवेतत्वस्यसाध्यतद्भावस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हत्वरितसत्तावत्तित्वनसत्तात्वेस्यवसाध्यसंबंधितावच्छेदकत्वायोगाद्दाह। गुणासमवेतत्वस्येति। नचरूपरसादीनांप्रत्येकासमवेतत्वेसती
स्पृक्तावपिसत्तावारणसंभवाद्दिनिगमकाभावेनतेषामनंतानांगुरुशरीराणामवच्छेदकत्वप्रसक्तौनरूपेक्ष्यलघुशरीराणांरूपत्वरसत्वा
दिनामेवबहूनांतथात्वौचित्यमितिवाच्यं। गुरुशरीराणामपिरूपरसादिप्रत्येकासमवेतत्वेसतिद्रव्यसमवेतत्वादीनांसर्वेषामेवघटप
टादिद्रव्यघटत्वपटत्वादिजातिविशेषपदार्थसाधारण्यानुरोधाद्दिनिगमनाविरहेणावच्छेदकत्वस्यप्रामाणिकत्वात्रूपत्वरसत्वगु
णत्वादीनामखंडानामपिद्रव्यजात्यादिसाधारण्यविरहेणावच्छेदकत्वाकल्पनादितिभावः। ननत्वं। नावच्छेदकत्वं। अत्रद्रव्यत्वेसाध्येरू
परसादिप्रत्येकासमवेतत्वेगुणासमवेतत्ववासनिद्रव्यसमवेतत्वनसाध्यसंबंधितावच्छेदकं किंतुद्रव्येतरासमवेतत्वमात्रंलाघवात्ता
वतैवघटादिद्रव्यगुणकर्मघटत्वादिजातिविशेषपदार्थानामुपग्रहसंभवादितिचिंत्यं। मतमिदंदूषयति। विरुद्धेसादिना। कथंविरोधइ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शि॰टी॰ज॰ ति। तथा च सत्तात्वावच्छेदेनैव गुणान्तराभावयोः सामानाधिकरण्यसंभवात् गुणवान् सत्त्वादित्यादावतिव्याप्तिरिति भावः। ननु एकावच्छेदे
२२ न विरुद्धभावाभावयोः सामानाधिकरण्याप्रतीतेरेव विरोधः कस्मात् इत्यत आह। कथं चेति। साध्यसंबंधानवच्छेदकत्वप्रकारेणापि हेतुप्र॰
योगे द्वंद्वप्रवेशपारिस्त्यपि प्रयोगापत्तेरिति भावः। ननु तत्प्रकारेण हेतुप्रयोगे न दुर्मस्य साध्यसंबंधिनावच्छेदकत्वं न तत्र किंतु प्रकृतव्याप्तिनिय
न धर्मान्तराघटितत्वमतिप्रकृतव्याप्तिनिपतत्वं तत्स्वरूपत्वादेरण्यहस्तत· ननु प्रमेयत्वादित्यत्र तानाप्रसक्तिरित्यत आह। तथा परामर्शादिति। स्व
रूपसंबंधरूपावच्छेदकत्वावगाहिपरामर्शादित्यर्थः। कथमित्यनुपपत्ते अनुमितिरिति। यद्धि धूमत्वादौ स्वरूपसंबंधात्मकमवच्छेदकत्वं नाम राम॰
वस्तु स्यात् तदा तद्गोचरपरामर्शसंभवात् ततोऽनुमितिः संभाव्येत वस्तुतस्तत्रैव मानाभावः नहि धूमो वह्निसमानाधिकरण इत्यादिप्रतीतिः २२
धूमाद्यमित्यादिबोधव्याहृतं धूमत्वसामानाधिकरण्यावच्छेदकत्वमवगाहत इति कस्यापि अनुभवसिद्धमिति भावः। यद्धर्मविशिष्टहेतुत्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धिकरणत्वं यद्धर्मावच्छिन्नाधिकरणत्वं। ननु हेतुमत्त्वस्य साध्यसंबंधितावच्छेदकत्वे धूमवत्तादेहेतुनावच्छेदकस्य तथात्वप्रसंगेनिं मूलसङ्गतो वि

रुद्धमत आह। यथात्विति। धूम एव मात्रो धर्मो यस्येति धूमवत्त्या धूममात्रपराद्धमवन्तोलाभसंभवान्न तरित्यद्वैयवन्हेस्त्विति पाठं व्याचष्टे वन्हि

मत्त्वस्त्विति। इत्यादीत्यादिपदात् वन्हित्वमित्यादावपि न वन्हिमत्त्वमित्याद्यर्थः॥ विरुद्ध इति। साध्याविरुद्धदिगवच्छिन्नवृत्तिकस्य साध्यविरुद्धका

लावच्छिन्नवृत्तिकस्य च साधनस्याधिकरणतायां स्वरूपसंबंधरूपस्याधिकरणतावच्छेदकत्वस्याभावात् एनं वच्छेदकदिगाद्यवच्छिन्नवृत्ति

कस्य च न देशावच्छेदकत्वनियमात् तथा च भूगोलकमुदयगिरिमहस्ताचलवत्तात् कपालेन हूढ्यवत् न हूढ्यं साहित्यादावव्याप्तिरिति भावः॥ न्यू

नेति। साध्यन्यूनदेशवृत्तिकस्य साध्यन्यूनकालवृत्तिकस्य च हेतोरधिकरणतायां साध्याधिकरणतावच्छेदकत्वासंभवात्। न न्यूनदेशादिवृत्तिक

स्य न देशावच्छेदकत्वनियमात् तथा चेदं द्रव्यं पृथिवीत्वात् कालाघटत्ववान् घटादित्यादावव्याप्तिरिति भावः॥ ननूक्तनियमद्वयमप्रयोजकमत आ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥तुल्यवृत्तिकयोश्चनद्रूमेद्रूयाधिकरणत्वयोर्मिथोऽवच्छेद्यावच्छेदकभावस्यानियंतुमशक्यत्वात्।नाप्यन्यूनवृत्तित्वं।न्यूनवृत्तिकधूमादेरव्याप्यतापत्तेः॥किंत्वनतिरिक्तवृत्तित्वंसाम्यन्यूनवृत्तिनत्वत्वमितितुयावत् ॥

शिरोजः २३ हः।तुल्यवृत्तिकयोश्चेति।चकारेणतुल्यवृत्तिकयोःपरिग्रहः।अवच्छेद्येति।स्वरूपसंबंधरूपावच्छेद्यावच्छेदकभावस्येत्यर्थः।नियंतुमवधारयितुंअ
शक्यत्वादिति।नयाचतद्रूपवत्वावच्छेदेनतद्रूपवत्वमित्यादिप्रतीत्याऽनतिरिक्तवृत्तित्वस्यैवलक्षणस्यावगाहनात्हेतुसाध्याधिकरणत्वयोःस्व
रूपसंबंधरूपावच्छेदकत्वेमानाभावात्अप्रसिद्धिरेवदोषोलक्षणस्येतिभावः।नापीति।अपिनाअन्यूनानतिरिक्तवृत्तित्वस्यपरिग्रहः।उभयत्रदू
षणमाह।धूमादेरिति।ननुवाच्यत्वज्ञेयत्वादिसाध्येसाध्याधिकरणातिरिक्ताप्रसिद्धिरतआह।साम्यन्यूनेति।साम्यत्वोपं।नयाचस्वोपाधिकरणत्वान्यू
नवृत्तिसाध्याधिकरणताकत्वमित्यर्थः।गोत्वस्याश्वन्यूनवृत्तिभिन्नत्वाद्गौरश्वत्वादित्यादावतिव्याप्तेराह।स्वव्यापकेति।अयइति।लाघवा ८८ २२
द्न्यान्याभावगर्भैवव्याप्तिरित्यादिरित्यर्थः केचित्तुमनेनधूमस्यधूमवनद्व्यादियथाश्रुतापव्यारव्यारूपास्तरसः।

अतोनकेवलान्वयिन्यव्याप्तिः।अत्रचयद्न्यूनवृत्तिसाध्यंनत्वंस्वव्यापकसाध्यसंबंधित्वंपर्यवसन्नमपेक्ष्यगौरवंपरमवशिष्यतेतत्त्वयंयकारस्वाशेविवेचइष्यनइत्याहुः।उपाधिनेति॥विशेषणतापन्नेनाणव्यनुगमवेशेनेतिपाठान्तरम्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri